Total Pages—6 **UG/I/SANS/H/II/19**

MIDNAPORE CITY COLLEGE LIBRARY ESTD.-2017

# 2019

## SANSKRIT

## [ Honours ]

## PAPER – II

*Full Marks* : 90

*Time* : 4 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

**1.** ब्रह्मचारिवृत्तान्तः कुत्र श्रूयते ? कोऽसौ ब्रह्मचारी ? स्वप्नवासवदत्त–नाटकमवलम्ब्य ब्रह्मचारिवृत्तान्तस्य नाटकीयतात्पर्यं विव्रियताम् । 10

*अथवा*

प्रजानुरञ्जकराजरूपेण आदर्शप्रेमिकरूपेण च राज्ञः उदयनस्य चरित्रं सम्यग् व्याख्यायताम् ।

( *Turn Over* )

2. अधोलिखितयोः श्लोकयोरेकतरः सरलसुरगिरा देवनागर्य्यां व्याख्येय : 8

(क) प्रद्वेषो बहुमानो वा संकल्पादेव जायते ।
भर्तृदाराभिलाषित्वादस्यां मे महती स्वता ।।

(ख) दुःखं त्यक्तं वद्धमूलोऽनुरागः स्मृत्वा स्मृत्वा याति दुःखं नवत्वम् ।
यात्रा त्वेषा यद् विमुच्येह वाष्पं प्राप्तानृण्या याति बुद्धिं प्रसादम् ।।

3. अधोलिखितेषु प्रश्न-षट्कं सरलसुरगिरा देवनागर्य्या च समाधेयम्— 1 × 6

(*a*) स्वप्नवासवदत्तनाटकस्य क उत्सः ? नाटकस्यास्य का नायिका ?

(*b*) "चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः"— कः कस्मिन्नङ्के उक्तवान् ?

(*c*) उदयनस्य बीणानाम किम् ? केन प्रदत्ता इयं बीणा ?

(*d*) रुमण्वान् कः ? कस्मिन्नङ्के तस्य वर्णनं प्राप्यते ?

(*e*) स्वप्नवासवदत्ते कति अङ्काः सन्ति ?

(*f*) कस्मिन्नङ्के स्वप्नवृत्तान्तः श्रूयते ? केन सः स्वप्नः दृष्टः ?





4. अधोलिखितानां त्रयाणां प्रकृति-प्रत्ययौ निर्णेयौ— 2 × 3

जायते, संकल्पात्, त्यक्तम्, स्मृत्वा, विमुच्य ।

5. अभिज्ञानशकुन्तलनाटकस्य चतुर्थाङ्कस्य श्रेष्ठत्वं प्रतिपाद्यताम् । 12

*अथवा*

का आसीत् सानुमती ? कस्मिन्नङ्के सा दृश्यते? अभिज्ञान-शकुन्तलनाटके सानुमतीवृत्तान्तस्य किमस्ति नाटकीयतात्पर्यम् ?

6. निम्नलिखितेषु पद्यमेकं सरलसुरगिरा देवनागर्य्या च व्याख्येयम् — 8

(*a*) इदं किलाब्याजमनोहरं वपुः
तपःक्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति ।।

(*b*) शमप्रधानेषु तपोधनेषु
गूढं हि दाहात्मकमस्ति तेजः ।
स्पर्शानुकूला इव सूर्यकान्ता-
स्तदन्यतेजोऽभिभवाद्वमन्ति ।।

(*c*) भवन्ति नम्रास्तरवः फलागमै-
र्नवाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरूषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ।।

7. अधस्तनेषु <u>एकतरस्य</u> संस्कृतेन देवनागर्य्यां भावसम्प्रसारणं कार्यम् — 4

(*a*) न प्रभातरलं ज्योतिरुदेति वसुधातलात् ।

(*b*) अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् ।

8. निम्नलिखितप्रश्नेषु <u>द्वादशानामुत्तरं</u> सरलसुरगिरा देवनागर्य्यां प्रदीयताम्— 1 × 12

(*a*) अभिज्ञानशकुन्तलनाटकस्य प्रथमाङ्कस्य नाम किम् ?

(*b*) दुष्यन्तः कस्मिन्नङ्के शकुन्तलायाः हस्ते मुद्रिकां बध्नाति ?

(*c*) शकुन्तला दुष्यन्ताय अङ्गुलीयकं किमर्थं दर्शयितुं न समर्था ?

(*d*) दुष्यन्तस्य पत्न्यः काः ?

(*e*) सानुमती कस्याः प्रियसखी ?

(*f*) पतिगृहे यात्राकाले के के शकुन्तलया सह जग्मुः ?

(*g*) का स्रष्टुः आद्या सृष्टिः ?

(*h*) कीदृग्विधा नान्दी अभिज्ञानशकुन्तलनाटके श्रूयते ?

(*i*) नान्द्यन्ते कः प्रविशति ? तस्य तादृग्नामकरणे किं कारणम् ?





(*j*) प्रस्तावनाभागे कस्य ऋतोर्वर्णनं प्राप्यते ?

(*k*) अभिज्ञानशकुन्तलनाटकस्य किमस्ति भरतवाक्यम् ?

(*l*) कः दीर्घापाङ्गः ?

(*m*) शाकुन्तले करुणरसः केषु अङ्केषु दृश्यते ?

(*n*) मेघप्रतिच्छन्दप्रासादे कः विदुषकमाक्रमति ?

(*o*) महर्षिकण्वः कस्मात्सकाशात् शकुन्तलायाः विवाहवृत्तान्तम् ज्ञातवान् ?

9. प्रस्तावना का भवति ? साहित्यदर्पणानुसारमस्याः प्रकारभेदः आलोच्यताम् । 10

*अथवा*

साहित्यदर्पणानुसारं नाट्यसन्धीनामालोचना क्रियताम् ।

10. अधोलिखितानां <u>चतुर्णां</u> प्राकृतपदानां संस्कृतरूपं विलिख्यताम्— 1 × 4

परिहाइस्सदि, तादकस्सवस्स, अदिपिणद्धेण, धम्मआरिणो, वअस्सभावेण, ओहीणेसु, सउन्दले ।

**11.** कस्यचिदेकस्य टीका लेख्या— 5

(*a*) पूर्वरङ्गः

(*b*) भरतवाक्यम्

(*c*) भारतीवृत्तिः

**12.** अधोलिखितेषु पञ्चानां प्रश्नानामुत्तरं सरलसुरगिरा देवनागर्य्या च देयम्— 1 × 5

(*a*) चम्पूकाव्यस्योदाहरणं किम् ?

(*b*) नान्दी कतिधा ? एकमुदाहरणं देयम् ।

(*c*) नाटिकायां कत्यङ्काः सन्ति ? एकमुदाहरणं लेख्यम् ।

(*d*) आमुखस्य अपरनाम किम् ?

(*e*) संस्कृतनाटके कः पताकानायको भवति ?

(*f*) धीरोदात्तनायकस्योदाहरणं देयम् ।

(*g*) नाट्यतत्त्वानुसारं किमस्ति श्रेष्ठं रूपकम् ?

———